# अभिज्ञानशाकुन्तलस्य प्राकृतिकं दिग्दर्शनम्

मुना घिमिरे[*]

**लेखसार :**

प्रस्तुतोऽयमालेखो महाकवेः कालिदासस्य प्रकृतिसौन्दर्यवर्णनेऽभिरुचिसूचनपरको वर्तते। अनेन महाकवेः प्रकृतिप्रियता ज्ञायते। अये मित्र यदि त्वं वासन्तीतारुण्या मनोहरपुष्पस्य ग्रीष्मतुल्यप्रौढावस्थायाः प्रचुरोत्तमोत्तमफलं प्राप्तुमीहसे, आत्मनः प्रभावशालिनीं सामग्रीमेकत्रैव प्राप्तुमिच्छसि तर्हि शाकुन्तलं सेव्यताम् इति शाकुन्तलसेवनेन स्वर्लोकभूलोकयोरात्मच्छान्तिः समृद्धिश्च प्राप्स्यसि। वासुदेवविष्णुवर्येण गेटेमहाशयस्य भावः श्लोकरूपेण गुम्फितोऽस्ति। सत्यमिदं यद् वैदिक ग्रन्थेषु प्रकृतिचित्रणं पदे पदे दृश्यते। ऋग्वेदादिषु प्रकृतिर्मातृत्वेन परिगृहीतास्ति। अभिज्ञानशाकुन्तले कविकालिदासः शकुन्तलायाः सौन्दर्यवर्णनप्रसङ्गे शकुन्तलां प्रकृतिं च उपमेयोपमानत्वेन प्रस्तौति। तपोवनस्य स्वभावोक्त्यलङ्कारेण प्रकृत्याः सजीवं वर्णनं महाकवेः पर्यावरणस्नेहं प्रदर्शयति। एतेन संस्कृतवाङ्मयं न केवलमध्यात्मपरकमपितु लोककल्याणपरकं लौकिकं प्रकृतिप्रियं समुत्कृष्टं मानवजीवनं चिन्तयति इत्येवं ज्ञायते। अनेनानुसन्धानेनात्मकालेखेन प्रकृतिसौन्दर्याध्ययनार्थं प्रवृत्तानां विशेषतो संस्कृतसाहित्याध्येतृणां कृते परमलाभो भवेदिति अपेक्ष्यते।

**कुञ्जीशब्दाः** - प्रकृतिः, कालिदासः, चित्रणम्, शकुन्तला।

**विषयप्रवेशः -**

कवेः कर्म काव्यम् इत्युच्यते। ननु कविरिति किम् ? इत्यत्र यस्य कर्म काव्यं स्यात्, सः कविः भवति। कवते = सर्वं जानाति, सर्वं वर्णयति, सर्वं सर्वतो गच्छति वा इति कविः (शब्दकल्पद्रुमः)। कु शब्दे धातोः "अचः इः" (पा.सू. ४-१३८) इति सूत्रेण इप्रत्यये कविरिति शब्दो निष्पद्यते। कविः शब्दः बहुष्वर्थेषु प्रयुज्यते, यथा- ब्रह्म, ईश्वरः, मेधावी, पण्डितः, सूर्यः, ऋषिरित्यादयः। ब्रह्म इति, आदि कविः, येन काव्यरूपात्मकं जगदिदं कल्पितम्। तथैवाजस्रं प्रवाहमानया परम्परया सर्जकत्वात् वाल्मीकिवेदव्यासकालिदासादिष्वपि कविरिति व्यवहारो भवति।

ननु ! एवं सति कविना कृतं यत्किमपि काव्यत्वेनाभिधीयेत ? न हि। अथ किं तर्हि ? किं काव्यस्य लक्षणम् ? इत्यत्रोच्यते ! न कवेस्तथाविधं कर्म काव्यम्। काव्यलक्षणं पूर्वकृतसूरिभिस्तदत्र क्रमशः प्रस्तूयते –

* साहित्याचार्या
Email: ghimiremuna19@gmail.com

सर्वादौ शुक्लयजुर्वेदस्य मध्यन्दिनीशाखायाः चत्वरिंशतमेऽध्याय ईशावास्योपनिषदि एवं ह्याह – कविर्मनीषी परिभू: स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्य: (यजुर्वेद ४०/८ )। अष्टम-मन्त्रस्योत्तरार्धे कवेर्लक्षणं काव्यस्य च लक्षणं दृश्यते “कवि: क्रान्तदर्शी सर्वदृक्” इति शङ्करः। अत्र क्रान्त-शब्दस्यार्थ: अतीत:, अतीतशब्द: त्रिकालस्योपलक्षणम्, अथैव शङ्करः सर्वदृगिति अर्थं विदधाति कवि: मनीषी, काव्यं चाल्पयत्नेन बोध्यं याथातथ्यमर्थं शाश्वतार्थस्य प्रकाशकम्,

अग्निपुराणे काव्यलक्षणम् –

संक्षेपात् वाक्यमिष्टार्थं व्यव्छिन्नापदावली।
काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्।। (अ.पु.३३६/६-७४)

यत्र सङ्क्षेपेन वाक्येन इष्टार्थस्य व्यञ्जना भवेत्, पदावली विच्छिन्ना न स्यात्, गुणालङ्कारयुतं दोष-वर्जितं काव्यमिति अग्निपुराणकारस्य मति: ।

नाट्यशास्त्रकारो भरत: प्राह-

मृदुललितपदाढ्यं गूढशब्दार्थहीनम्,
जनपदसुखबोध्यं युक्तिमदत्र योज्यम्।
बहुकृतरसमार्गं सन्धिसन्धानयुक्तम्,
स भवति शुभकाव्यं नाटकप्रेक्षकाणाम् ।। ( भरतः, नाट्यशास्त्रम्- )

सुकुमारपदैर्ललितपदै: च युतं गूढशब्दार्थविरहितं जानपदीयै: ग्राह्यम्, अत्र नाट्येषु प्रयोज्यम्

विविधरसमार्गेषु गमनक्षमः अर्थात् अनेकरसानां प्रवाहः स्यात्, सन्धिसन्धानयुतं भवेत्, तादृक्षं काव्यं शुभ काव्यं भवति इति।

सारतया काव्यलक्षणस्य समानत्वेऽपि विविधैरन्यैराचार्यैः स्वमतानुसारेण तल्लक्षणं शब्दतः भिन्नभि-न्नतया प्रकटितम्। तद्यथा दिक्दशर्नं क्रियते-

अभिनवगुप्ताचार्य कथयति - कवनीयमिति काव्यम्। अयमाशयो यत् रचनाव्यापारौ च काव्यमिति।

आचार्य भामहः- शब्दार्थौ सहितौ काव्यम्, गद्यं पद्यं च तद् द्विधा इति।

आचार्य मम्मट: - तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

कुन्तक: - शब्दार्थसहितौ वक्र कविव्यापारशालिनौ। बन्धे व्यवस्थितौ काव्यम्।

आचार्य विश्वनाथ – वाक्यं रसात्मकं काव्यम्।

जगन्नाथ: - रमणीयार्थप्रतिपादकः शब्द: काव्यम्।

काव्यस्य यल्लक्षणं लक्षणकारै: विहितं ततो द्वित्राणामत्र मनाक् व्याख्या विधीयते येन काव्यस्वरूपस्य पाठकानां मनस्यालोकस्स्यात्-

आचार्य मम्मट: - काव्यस्य लक्षणं एवमकरोत् “तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि”।

शब्दार्थौ दोषविरहितौ स्याताम्, दोष इत्युक्ते विधेयविमर्शादि। काव्यं पुनः माधुर्यादि गुणयुतं भवेत्। अलङ्कारस्तु काव्ये भवत्येव, परन्तु कदाचित् स्फुटालङ्कारविरहितमपि न काव्यत्वहानिरिति मम्मट:।

आचार्य विश्वनाथस्य काव्यलक्षणमेवमस्ति – "वाक्यं रसात्मकं काव्यम्"। श्रृंगारादिरसेन युक्तं वाक्यं काव्यम् इति।

जगन्नाथ: वक्ति — काव्यलक्षणविषये "रमणीयार्थप्रतिपादकः शब्द: काव्यम्"। पाठाकानामाह्लादकत्वं येन भवति, स असौ रमणीयार्थ:, अस्य प्रतिपादकशब्दसहिता रचना काव्यमिति जगन्नाथः।

वामनमतानुसारं "काव्यं ग्राह्यमलङ्कारत् .... सौन्दर्यमलङ्कार:"। उपमोत्प्रेक्षाद्यलङ्कारयुतः प्रबन्ध: काव्यमित्यभिधीयते इति वामनः। अलङ्कार एव सौन्दर्यस्य परिचायकः ।

एवं साहित्यशास्त्रे विशदतया लक्षितं काव्यं द्विधा विभक्तं वर्तते श्रव्यदृश्यभेदेन। श्रव्यकाव्यस्य द्वौ भेदौ वर्तेते - प्रबन्धकाव्यं मुक्तककाव्यं चेति। दृश्यकाव्यस्यापि द्वावेव भेदौ विद्येते – रूपकम् उपरुपकञ्चेति। रुपकस्य दशभेदाः सन्ति, उपरुपकस्य चाष्टादश। रुपकस्य दशसु भेदेष्वन्यतमः प्रथमस्थानभाक् च नाटकं विद्यते। नाटकस्य लक्षणं विश्वनाथदिशा प्रस्तूयतेऽत्र -

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
विलासद्धर्यादिगुणवत् युक्तं नानाविभूतिभिः ॥
.....................................................।।
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमग्रं तु बन्धनं तस्य कीर्त्तितम् ॥" इति (सा.द.ष.प.७-११ श्लोकाः)

एतत् सर्वमपि लक्षणयुतमभिज्ञानशाकुन्तलनाटकं वर्तते।

काव्येषु नाटकस्यान्यतमं स्थानमस्तीति सर्वेऽपि काव्यशास्त्रिणः स्वीकुर्वन्ति। अभिज्ञानशाकुन्तलन्तु नाटकं प्राच्य-पाश्चात्यनाटकाकाशे चन्द्रायत इति च सकलैः साहित्यिकैरनुमोदितो विषयः। काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला इत्याभणकं प्राचीनकालतः अद्यावधि प्रसिद्धिमावहति। न केवलं प्राच्यैरपितु पाश्चात्यैरपि विद्वद्भिर्नाटकमिदमत्यन्तं प्रशंसितं प्राप्यते। शाकुन्तलविषये पाश्चात्य-विदुषा गेटेमहोदयेन आमुक्तकण्ठेनेत्थमुक्तम्-

वासन्तं कुसुमं फलं च युगपद् ग्रीष्मं च सर्वं च यत्
यच्चान्यन्मनसो रमायनमतः सन्दर्पणं मोहनम्।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः
ऐश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तमं सेव्यताम् ॥ इति।

प्रकृतेर्मानवीकरणे सिद्धस्य महाकवेः कालिदासस्यान्यतमकृतौ शाकुन्तलनाटके प्रकृतेर्वैचित्र्यत्वेन मनस आह्लादजनकत्वेन च यद्वर्णनं कृतमस्ति कविना, तदस्मिन्नालेखे सङ्क्षिप्ततया प्रस्तूयते।

**समस्याकथनम्**

महाकविना कालिदासेनाभिज्ञानशाकुन्तलाख्ये नाटके प्रकृतेर्चित्रणं मनोहारितया कृतमिति सुप्रसिद्धमेव। प्रकृतिचित्रणपरकेऽस्मिन्नालेखेऽत्र निम्नानुसारेण समस्या उपस्थापिता विद्यते-

महाकविकालिदासस्य प्रकृतिं प्रति कीदृशी दृष्टिर्वर्तते ?

अभिज्ञानशाकुन्तलनाटके प्रकेतेर्चित्रणं कथमस्ति ?

**उद्देश्यनिर्धारणम्**

सामस्याकथनक्रमे उत्थापितानां समस्यानां समाधानमेवात्र मुख्योद्देश्यं वर्तते। अत उद्देश्यनिर्धारणं यथा वर्तते-

कविकुलगुरोर्कालिदासस्य प्रकृतिविषयकदृष्टेर्वर्णनम्,

अभिज्ञानशाकुन्तलनाटकस्य प्रकृतिचित्रणविषयकवर्णनम्।

**शोधविधि:**

शोधप्रविधिं विना कमपि शोधप्रबन्धं चारुतया सम्पादयितुं न शक्यते। अतः अभिज्ञानशाकुन्तले प्रकृतेश्चित्रणं महाकविना यथा विहितं तथैवात्र ग्रन्थकारस्य मनोगतभावं बुध्वा, कवि: किमत्र वक्तुं वाञ्छतीति गम्यार्थमवबुध्य विवरणं लेखे उपस्थापितमस्ति। कतिपय सन्दर्भे शब्दः पृथगर्थं प्रस्तौति, परं गम्यार्थम् अन्यदेव भवति, तस्यैवात्र विवेचनात्मिकां शैलीमनुसृत्य शोधपत्रमिदं प्रकाश्यते।

**शोधसीमाङ्कनम्** –

लौकिकसाहित्यस्य देदीप्यमानतारकस्य दीपशिखाकविकुलगुर्वाद्युपाधिना अलङ्कुर्वाणस्य महाकवि-कालिदासस्य महार्हवैदुष्यमावहतः अभिज्ञानशाकुन्तलस्य प्रकृतिचित्रणमनुसृत्य शोध-कर्त्तेदं शोधपत्रं लिलिखिषुरस्ति। अतः किं काव्यम् ? इति काव्यलक्षणपुरस्सरम् अभिज्ञानशाकुन्तले वर्णितं प्रकृतिनिरुपणं विधास्यते। प्रकृतिचित्रणे वेदेषूपलब्धं प्रकृतिवर्णनमपि प्रासङ्गिकत्वेन यथावसरं चर्च्यते। काव्यलक्षणं पुरोनिधाय प्रकृतिचित्रणं कुर्वाणः अन्य: कश्चिदपि विषयः प्रकृतशोधपत्रस्य परिधौ नायास्यन्ति।

**विषयविवेचनम्**

**प्रकृति:**

प्र उपसर्गपूर्वकात् डुकृञ् करणे इति धातो: भावे “स्त्रियां क्तिन्” इति सूत्रेण क्तिन् प्रत्यये कृते प्रकृति शब्दो निष्पद्यते। अस्यार्थ: कस्यापि वस्तुनः स्वस्मिन् स्थिति: प्रकृति: भवति। प्रकृष्टा कृति: प्रकृति:, अनेन व्युत्पत्ति-लभ्येनार्थेन प्रकृतिपदात्र जगदिति गृह्यते। जगत्यस्मिन् स्थावरजङ्गमादयो सकलजीवात्मानस्सन्ति, अतः प्रकृतिपदात् सर्वेऽप्येते बुद्ध्यन्ते। ईश्वरस्येदं प्रकृष्टा कृतिरेव। यदि प्रकृतौ विसंगति: मनुष्यै: क्रियते, तर्हि दैवीयापत्ति: समजायते। स्वस्मिन् स्थितिरेव साम्यावस्थास्ति- “सत्वरजस्तमसां साम्यावस्था प्रकृति:” इति। वातपित्तादयो यदा प्रकृतौ भवन्ति, तदैव जन: स्वस्थो वर्तते, अन्यथा रुग्ण:। लेखेऽस्मिन् मुख्यतया अभिज्ञानशाकुन्तलीया प्रकृतिः वर्ण्यते। किन्तु प्रासङ्गिकतया सर्वस्यापि संस्कृतवाङ्मयस्य मूलभूतेषु वेदेषु प्रकृतेः कीदृशं स्थानं वर्णितमस्ति इत्यतः अतिसङ्क्षिप्ततया दिग्दर्शनमेवात्र प्रस्तूयते।

**वेदेषु प्रकृतिचित्रणम्**

संस्कृतवाङ्मये किं वा वैदिकवाङ्मये सर्वत्रैव प्रकृति: सजीवतया चित्रिता परिदृश्यते। वेदेषु बहुधा प्रकृतिं देवीं मत्वा तस्याः स्तुति: क्रियते। यजुर्वेदे सर्वाधारतया, सर्वसम्पत्तया, सर्वातिशयतया च प्रकृतिः सम्यक्तया सम्मानिता, नमस्कृता वर्तते। यथा- नमो वृक्षेभ्यः (यजुर्वेद १६/१७), वनानां पतये नमः (यजुर्वेद १६ /१८), ओषधीनां पतये नमः (यजुर्वेद १६/१९), वृक्षाणां पतये नमः (यजुर्वेद १६/१८), अरण्यानां पतये नमः (यजुर्वेद १६/२०)।

ऋग्वेदस्य अरण्यानी-सूक्ते वनानां स्तुतिं कुर्वाणः ऋषिः वक्ति- अरण्यानी कमपि न तुदति। वेदेषु प्रकृतिमाता जनकल्याणाय अन्नवृक्षादियुक्ता भवेदिति विशालभावनया चिन्तनं विहितमस्ति। तत्राद्ये वेदे अनेन प्रकारेण प्रकृतिवर्णनं दृश्यते - शं न उरूची भवतु स्वधाभिः (ऋग्वेद ७/३५/३), शमन्तरिक्षं दृश्ये नो अस्तु (तत्रैव १०/३५/०५), शं नः सिन्धवः शमु सन्त्वापः (तत्रैव ७/३५/०८), यजुर्वेदस्तु गर्वेण पृथिवीं धरित्रीं वदति - ध्रुवासि धरित्री (यजुर्वेद १४।२२)। अथर्ववेदेऽपि " विश्वम्भरा " इत्यादि नाम्ना अस्याः स्तुतिर्दृश्यते – विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी । (अथर्ववेद १२/१६)

वेदेषु अनेकधा पृथिवी मातृरुपेण स्तुतास्ति। पृथ्वी जैवविविधतायाः पोषिका संरक्षिका च वर्तते। अथर्ववेदीयेन ऋषिणा भूमिमातुः रक्षायाः भावमनेन मन्त्रेण प्रकटितमस्ति - माता भूमिः पुत्रो अहं पृथिव्याः। (तत्रैव १२/ १ / १२ )

अथर्ववेदस्य पृथ्वीसूक्ते च प्रतिपदं प्रकृति मातुः पर्यावरणस्य च संरक्षणाय उपदेशो विहितो दृश्यते। यथा- भूमिर्माता, भ्रातान्तरिक्षं , द्यौर्नः पिता (तत्रैव ६/१२०/२)। पृथिवी माता द्यौष्पिता (यजुर्वेद २/१०/११)। द्यावा पृथिवी पिता माता। (ऋग्वेद ५/४३/२। एवम् उपनिषद्यपि प्रकृत्याः वर्णनं समुपलभ्यते। एवमेव पुराणेतिहासेष्वपि बहुत्र एतादृशी भावना वर्णिता दृश्यते। लौकिक-कवयोऽपि निजकाव्यग्रन्थे प्रकृतिं वर्णयन् निजकल्पनावैदूष्येन पाठकानां मनसि स्वस्थानं कुर्वन्तः दृश्यन्ते। अस्यामेव परम्परायां कविकालिदासस्य अभिज्ञानशाकुन्तले प्रकृतिनिरुपणमिति प्रकृतशोधस्य विषयः।

## अभिज्ञानशाकुन्तलम्

कविकुलगुरूः कालिदासश्च न केवलं प्राच्यकाव्यक्षेत्रे, अपितु सकल-काव्यजगति सुप्रसिद्धो वर्तते। तस्य इदं नाटकमभिज्ञानशाकुन्तलाख्यं विश्वप्रसिद्धम् अस्ति। अस्य नाटकस्य अभिज्ञानशाकुन्तलाख्यस्य उपजीव्यं महाभारतस्यादिपर्वो वर्तते। महाभारतस्य आदिपर्वणः ६९ अध्यायतः ७४ अध्यायपर्यन्तं शाकुन्तलोपाख्यानं विद्यते। तत्र राजा दुष्यन्तस्य कण्वदुहितुः शकुन्तलायाश्च प्रणयकथा वर्णितास्ति। महाभारते यथा वृत्तान्तः प्राप्यते तस्य कविना कालिदासेन समयानुसारं परिवर्तनं विधाय नाट्यरूपेण स्वकल्पनाशक्त्या प्रस्तुतमस्त्यत्र।

अभिज्ञानशाकुन्तलनाटके सप्ताङ्काः सन्ति – दुष्यन्तः कदाचित् मृगया कर्तुं वनं याति, तत्रैव तपोवने महर्षिकण्वाश्रमे सुकुमारीं शकुन्तलां वीक्ष्य तस्य प्रेम्णि आसक्तः सम्भूय उभयोः सम्मत्या गन्धर्वविवाहं करोति। एवमेव दुष्यन्तः शकुन्तलाम् अभिज्ञानाय स्वमुद्रां समर्प्य शीघ्रागमनवचोभिः स्वराजधानीं प्रत्यागच्छति। महर्षेः दुर्वाससः शापेन विस्मृता शकुन्तला स्वतातस्य आज्ञया हस्तिनापुरं प्रति गच्छति। तत्र दुष्यन्तः शकुन्तलां नाभिजानाति। एवं संयोगवियोगात्मिका इयं कथा सप्तमेङ्के सुखेन परिसमाप्यते । अत्रैव कालिदासस्य प्रकृतिस्नेहं पदे पदे दृश्यते। प्रायः नाटके सुरम्यप्रकृतियुतस्य वनप्रदेशस्य वर्णनं करोति महाकविः।

## शाकुन्तले प्राकृतिकं चित्रणम्

कविकुलगुरुकालिदासस्य समास्वपि कृतिषु प्रकृत्याः सजीवं मनोरमं प्रभावशालि च चित्रणमुपलभ्यते। कविष्वग्रगण्यकालिदासस्य प्रकृतिः सर्वत्रैव सजीवमिवाभासते। प्रकृत्या सह मनुजामात्मीयता कालिदासस्य कृतिषु अनेकसन्दर्भेषु च दरीदृश्यते। इतः पूर्वं कालिदासेन कुमारसम्भव-महाकाव्ये पार्व-

तीदेवीप्रमुखपात्रत्वेन स्वीकृता, रघुवंशमहाकाव्ये च भगवती सीता नायिकात्वेनाभिमता, परन्त्वस्मिन्नाटकेऽभिज्ञानशाकुन्तलाख्ये सामान्या प्राकृतिका शकुन्तला एव नायिकात्वेन समभिमता। परन्तु तत्र तत्र प्राकृतिक-वर्णनेनासन्तुष्टः कविः शाकुन्तले प्राकृतिकसौन्दर्यस्य यथेष्ट-वर्णनेन सन्तुष्टो जात इति वक्तुं शक्यते। अस्य सर्वातिशायिन्या विलक्षणया सरसया प्रतिभासम्पन्नया प्रकृतिप्रस्तुतशैल्या न केवलं संस्कृत-साहित्यमपितु विश्वमेव आश्चर्यान्वितं जातमिति श्रूयते।

कालिदासस्य कृतिषु सर्वत्रैव सरलता, प्रसादगुणप्राचुर्यम्, उपदेशात्मकता, धार्मिकभावना, भारतीयोपमहाद्वीपीय-संस्कृति-व्यवहारादीनां बहुलतया दिग्दर्शनं प्राप्यते। अतः संस्कृतसाहित्ये कालिदास सर्वप्रतिष्ठितो वर्तते। एनं सम्बोध्य कस्यचिद् वचनमस्ति -

स विश्ववन्द्यो महतां कवीनां गुरुर्मनीषी कविकालिदासः।
यत्काव्यपीयूषरसप्रवाह-स्वादामितानन्दमयो हि लोकः।। इति .......?।

कालिदासस्य काव्यकलायाः विकास प्रकृति-वर्णनेनैव प्रारभ्यते। तस्य काव्येषु कथानकं गौणरूपेण वर्तते, परं प्रकृतिः सर्वस्वरूपेण विराजते। उत्तरकालीन-रचनासु कालिदासस्य जडचेतनेषु समदृष्टिः जाता इति कथयन्ति विद्वांसः। यथा शाकुन्तले आद्योपान्तरूपेण सरसं सुललितञ्च प्राकृतिकं वर्णनं विलसति। अभिज्ञानशाकुन्तलं नाटकन्तु अष्टानां प्रकृतीनां वर्णनेनैव प्रारब्धम्। यथा-

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ (अभि. १/१)

कालिदासस्य प्रकृति: न केवलं जडवत् मूकत्वेन न तिष्ठति, अपितु मनुष्यान्नतिरिच्यते। अत्र मानवसौन्दर्यादतिशायी वर्तते प्राकृतिकं सौन्दर्यम्। कालिदासस्य मतिरस्ति यदुभावपि इतरेतरस्य संवर्धकौ इति। कालिदासः मनुष्येषु प्रकृत्या: प्रकृतौ च मनुष्यस्य स्वरूपं पश्यति। प्रस्तावनायां नटीसूत्रधारयो: संवादे सूत्रधारः नटीं ब्रूते –

“आर्ये ! नन्विममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसयमधिकृत्य गीयताम्” इति। तदा सूत्रधारवचसा कालिदासः ग्रीष्मर्तुं वर्णयति –

सुभगसलिलावगाहा: पाटलसंसर्गसुरभिवनावाता:।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीया:। (अभि. १/ ३)।

नाटकस्यास्य नायिका शकुन्तला प्रकृति-शरीररूपा वर्तते। सा उन्मुक्त-प्राकृतिक-वातावरणे एव उत्पन्ना, वर्धिता च, प्रकृत्या एव च सा पालिता। तस्याः सकलाङ्गेषु प्राकृतिकं सौन्दर्यं प्रस्फुटितम् अस्ति। ग्रीष्मर्तौ घर्मतप्ते सुभगसलिलावगाहनं कर्तुं वाञ्छन्ति सर्वे। पाटलपुष्प: सर्वत्र स्वसुगन्धिं प्रसारयति। सघनवृक्षच्छयायां निद्रा सुलभा भवति। प्रदोषकालश्च अतिरमणीय: भवति।

कविकालिदासः ग्रीष्मर्तुं स्वभावोक्तिरलङ्कारस्य प्रयोगेण प्रकृतिस्नेहमभिव्यनक्ति।

तदाज्ञां “ग्रीष्मसयमधिकृत्य गीयताम्” इति परिपालयन् नटी प्रकृत्या: सुन्दरं मनोहारिणी च ग्रीष्मसमयस्य चित्रमुपन्यसति – ईषदीषच्चुम्बितानि भ्रमरै: पश्य सुकुमारकेशरशिखानि।

अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि।। (अभि. १/४)

कालिदासस्य कुमार्यः लतापादपान् सस्नेहं सिञ्चन्ति। अभिज्ञानशाकुन्तलस्य प्रथमेऽङ्के अनुसूया शकुन्तलां कथयति "हला शकुन्तले त्वत्तोऽपि तातकाश्यपस्याश्रम वृक्षकाः प्रियतराः इति तर्कयामि, यदनेन नवमालिका कुसुमपेलवा त्वमप्येतेषामालवालपूरणे नियुक्ता"। अस्योत्तरं ददन्ती शकुन्तला भणति "न केवलं तात नियोगः अस्ति मे सोदरस्नेह एतेषु"। शकुन्तलायाः लतावृक्षवनस्पतिषु सोदरस्नेहस्य भावः कालिदासस्य प्रकृतिप्रेम्णः पराकाष्ठा वर्तते इति सूचयति। मृगयायै गतः राजा दुष्यन्तः तपोवनं प्राप्य सूतं कथयति "नोदयाश्वान्, पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे" इति। अयमाश्रम भूभाग इति कथम् अवबुद्धवान् इति प्रश्ने कृते दुष्यन्तः उत्तरति "किं न पश्यति भवान् इह हि"-

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः।। (अभि., प्र.अं. १४)

आश्रमपरिचयात्मकानि वस्तूनि दर्शयन् राजा कथयति – लोकय, वृक्षाणामधः तरुकोटरस्थशुकशावकचञ्च्वा प्रकीर्णाः नीवाराः दृश्यन्ते। इङ्गुदीतैलयुतः सुचिक्कणप्रस्तराः अयमाश्रमेति सूचयति। प्रत्ययोगमात् स्यंदनगतध्वनयः सहजं सहन्ते, न भीताः सन् इतस्ततः न कूर्दन्ति भवन्ति इत्यर्थः। धौतवल्कलवस्त्रात् च्युततोयरेखाभिः मार्गः व्याप्त इति दृष्ट्वा आश्रमेति निश्चितः। तपोवनस्य स्वाभाविकं चित्रणमेव प्रकृतिस्वरूपमिति बोद्धव्यम्।

अन्यदपि-

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन।
एते चार्वागुपवनभुविच्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति।। (अभि., प्र.अं.१५ )

कुल्यवारिभिः यद् चपलवायुना इतस्ततः प्रसृतेन तटवर्तिशाखिनः धौतमूला इव प्रतिभान्ति।

आज्यधूमोद्गमेन नवकिसलयस्य भाभिन्ना जाता इति। एते दृश्यमाना मृगवत्साः स्वच्छन्दं दर्भाङ्कुरां चर्वन् विचरन्ति। अत आश्रमतपोवनमिति निश्चिनोमि।

आश्रमप्रदेशस्य एवं सजीवं मनोहरं वर्णनं नान्यत्र लभ्येत।

राजा दुष्यन्तः प्रकृत्या सह शकुन्तलामुपमिनोति –

इदमुपहितसूक्ष्मग्रन्थिना स्कन्ध देशे , स्तनयुगपरिणाहाच्छादिना वल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां, कुसुममिव पिनद्धं पाण्डुपत्रोदरेण। (अभि., प्र.अं.१९)

इदं नवं शकुन्तलावपुः स्कन्धे सूक्ष्मबन्धनेन पयोधरद्वयस्य पीनतच्छादकेन वल्कलवस्त्रेण पाण्डुपत्रोदरेण पुष्पमिव स्वकीयां शोभां न बिभर्ति।

कविकालिदासः व्रततिव्याजेन शकुन्तलायाः लावण्यं वर्णयति –

महाकविः कालिदासः स्वनायिकां शकुन्तलां लक्षीकृत्य ब्रवीति यत् - शकुन्तला प्रकृतितः पृथक्स्वरूपा नास्ति। शकुन्तलायाः पालनं पोषणं च प्रकृत्या कृतमिति वक्तव्ये नातिशयोक्ति: भवति। यतोहि मेनकया परित्यक्ता शकुन्तला महर्षिकण्वाश्रमे भवति। तत्रत्या: वृक्षवनस्पतयः शकुन्तलां स्वपुत्रीवत् परिपालयन्ति। तस्मादेव शाकुन्तलायाः सम्बन्ध: प्रकृत्या सह अधिकं दृश्यते। प्रकृत्या सह शकुन्तलायाः स्वाभाविक: सम्बन्धोऽस्ति। अत एव शकुन्तला अधिकमनोज्ञा दृश्यते —

अधरकिसलय रागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।। (अभि., प्र.अं.२२)

अस्या: अधरोष्ठ: रागेण अतिपेलवनवपल्लव इव प्रतिभाति भुजौ कोमलविटपानुकारिणौ तथा शरीरावयवेषु कुसुममिव मनोहारकं यौवनं सञ्जातमिति।

दीपशिखाकालिदासः प्रकृति: मानवीकरणेन प्रस्तौति। अनुसूया वक्ति – "हला शकुन्तले ! इयं स्वयं वरवधू सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमल्लिका एनां विस्मृतासि"। सहकारेण वनज्योत्स्ना ऊढा इति मानवीकरणमत्र मानववत् प्रकृत्या सह व्यवहारः कालिदासस्य प्रकृतिस्नेहं पुष्टीयति।

शाकुन्तलस्य द्वितीयेऽङ्के राजा दुष्यन्तः "इदं च मे मनसि वर्तते" इति कथयन् सुकुमारीशकुन्तलामनाघ्रातत्त्वं निरुपयन् वसन्तकाले प्रकृत्या: नवत्वं प्रकटयति –

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै
रनामुक्तं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधि:।।(अभि., द्वि.अं. ११)

अस्मिन् पद्ये कवि: निसर्गसुन्दरीशकुन्तलायाः मनोहरं चित्रणं कुर्वन्ननाघ्रातपुष्पेण सह औपम्यं प्रदर्शयति। यथा प्रकृति: तथैवेयं शकुन्तला नास्पृष्टा।

शकुन्तलायाः आश्रमात् प्रस्थानसमयस्य चित्रणमतीव कारूणिकं दृश्यते। तदा न केवलं ससखः कण्वः, अपितु सकलं तपोवनमेव शकुन्तलायाः वियोग-पीडया अश्रूणि मुञ्चन्तीति प्रतिभाति। विषयेऽस्मिन् कालिदासः प्रियम्बदामुखेन कथयति - उदगलितदर्भकवला मृग्यः, परित्यक्तनर्तना मयूराः।

अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव तलाः।। ( अभि. ४/११)।

अभिज्ञानशाकुन्तलस्य प्राणभूतांशे श्लोकचतुष्टये महर्षिकण्वेन कथित: तृतीयश्लोकः शकुन्तलाया: प्रकृतिप्रेम्ण: परिचायकः वर्तते –

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या: भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायाताम्।।(अभि., च. अं.८ )

शकुन्तलां पतिगृहं प्रेषणसमये महर्षि-कण्वः प्रकृतिं मानवरूपेण सम्बोधयन् गमनेऽनुमतिप्रदानाय निवेदयति - सेयं याति शकुन्तलेति। एतादृशं वर्णनमनेकत्र दृश्यते। अत्र प्रकृतिं मानवीकरणे प्रवीणता कालिदासस्य दरीदृश्यते।

कालिदासस्य प्रकृतेः न केवलं सौन्दर्यमेवास्ति, अपितु अस्य प्रकृति पीडां सोढुं सामर्थ्यं प्रददाति। शाकुन्तले चक्रवाक-विरहेण दुःखितां चक्रवाकीं दृष्ट्वा तथैवाहमपि पीडितास्मीति स्वात्मानं भावयति शकुन्तला। इत्थं दृष्ट्वा सख्या अनसूया-मुखेन दुःखसहनपरकं वचनमिदम्-

एषापि प्रियेण विना गमयति रात्रिं विषाददीर्घतराम्।
गुर्वपि विरहदुःखमाशाबन्धः साहयति।। ( अभि. ४/१५)।

एवं कविकुलगुरू-कालिदासः शाकुन्तले सर्वत्रैव सरसशैल्या प्रकृतिं वर्णयित्वा निरसजनानपि मोहयति। नाटकान्ते भरतवाक्यरूपेणापि प्रकृतिं नोपेक्ष्यतेऽयम्। यथा-

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः।। (अभि. ७/३५)।

एवं अभिज्ञानशाकुन्तले सर्वत्र प्रकृत्याः मनोहरं चित्रणं समीचीनं परिदृश्यते।

**निष्कर्षः**

कविकालिदासः नैजप्रकृतिवर्णननैपुण्यमभिज्ञानशाकुन्तले चारुतया प्रकटितं परिदृश्यते। प्रकृत्या समभावेन युक्ता शकुन्तलाधिकमनोज्ञा प्रतीयते। एवं स्पष्टं भवति यत् महाकवेः कालिदासस्य दृष्टिः पारदर्शिनी वर्तते, प्रकृतिं यथायथं द्रष्टुं शक्नोति, दर्शयति च। अत एव शकुन्तला विटपानुकारिणी वर्तते। कालिदासस्य बुद्धौ प्रकृत्याः सर्वोपि पक्षः स्पष्टो वर्तते। सौन्दर्यचित्रणे प्रायशः प्रकृतिमुपमानत्वेन प्रयुङ्क्ते। कालिदासस्य मतमस्ति यत् प्रकृतिः मनुष्यस्य सहचरी वर्तते, अन्योन्यं विना पङ्ग्वन्धवत् स्थिति समजायेत।

एवमभिज्ञानशाकुन्तल-नाटके प्रकृति-मुग्धेन कविना कविकुलगुरुणा कालिदसेन दुष्यन्त-शकुन्तला-कण्वादीनां चरित्रचित्रण-माध्यमेनापि सर्वत्रैव प्रकृतिचित्रणं विहितम्। तत्रापि शकुन्तलामाध्यमेन प्रकृतेः सर्वस्वं प्रकटितम्। राज्ञां प्रकृतिः, स्वभावः, कर्तव्यम्, तपस्विनां प्रकृतिः, आश्रमवासिनां सदाचारिणामाचारः व्यवहारश्च मर्यादापूर्वकं प्रस्तुतम्। तत्र नारीणां तत्रापि तापसकन्यानां स्वभाव-आचरण-संस्कारादीनां, मानवानां संयोगेन वृक्ष-तरु-गुल्म-लतापतादीनां चेतनोचितस्य व्यवहारस्य पूर्णतया सुललिततया सर्वांशेनानेन कविना नाटकेऽस्मिन् अभिज्ञानशाकुन्ते समुद्घाटितम्।

**कृतज्ञताज्ञापनम्** –

येषां विदुषां कृतिभ्यः प्रमाणमङ्गीकृत्य लेखोऽयं पूर्तिमागात्, तेषां समेषामपि ऋणी लेखकः भविष्यति। येषां च साहाय्येन लेखोऽयं प्रकाशनक्षमोऽभवत्, ते समेऽपि साभिवन्दनं कृतज्ञतावचोभिः सम्मान्यन्ते।

**सन्दर्भ-ग्रन्थ-सूची**

कालिदासः (२०१९), *अभिज्ञानशाकुन्तलम्*, व्या.-वेदप्रकाश शास्त्री, चौखम्बा सुरभारती प्रकाशन।

कालिदासः(२०१५), *अभिज्ञानशाकुन्तलम्*, व्या.श्रीकृष्णमणि त्रिपाठी, चौखम्बा संस्कृत प्रतिष्ठान।

कुन्तकः (२०११), *वक्रोक्तिजीवितम्*, चौखम्बा अमरभारती प्रकाशन।

जगन्नाथः (२०१०), *रसगङ्गाधरः*, व्या.पण्डित मदनमोहन झा, चौखम्बा विद्याभवन।

भरत: (सं. २०२८), *नाट्यशास्त्र*, चतु.सं., व्या. मधुसुदन शास्त्री, काशी हिन्दू विश्वविद्यालय।

भामह: (२०१८), *काव्यालङ्कार:*, संस्करण, हंस प्रकाशन।

मम्मट: (२०१६), *काव्यप्रकाश:*, द्वि.सं., व्या.सत्यव्रत सिंह, चौखम्बा विद्या भवन।

रुद्रट: (१९६५), *काव्यालङ्कार:*, वासुदेव प्रकाशन।

वामन: (वि.२०५८), *काव्यालङ्कारसूत्राणि*, ष. सं., व्या. बेचन झा, चौखम्बा संस्कृत प्रतिष्ठान ।

विद्यानाथ: (सं.२०३८), *प्रतापरुद्रीयम्*, कृष्णदास अकादमी।

विश्वनाथ: (२०१५ ), *साहित्यदर्पणम्*, अष्ट.सं.,व्या. सत्यव्रत सिंह, चौखम्बा विद्याभवन।

वेदव्यास (ई. २००४), *अग्निपुराणम्*, व्या. आचार्य शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन।

....,(ई. २००३), *ऋग्वेद:*, व्याख्या. स्वामी जगदीश्वरानन्द सरस्वती, वेदज्योति प्रेस।

..... (ई. २००३), *यजुर्वेद:*, व्याख्या. स्वामी जगदीश्वरानन्द सरस्वती, वेदज्योति प्रेस।

.....(ई. २००४), *अथर्ववेद:*, व्याख्या. स्वामी जगदीश्वरानन्द सरस्वती, वेदज्योति प्रेस।